M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 942

Title: Aditya Hrdaya Stotra

942

Complete

C

Aditya Rakdaya Stotra		Title
		Author
		Editor
Sa		Year, Vols.
		Publisher
942		Remarks

आ॰हृ॰ श्रीगणेशायनमः श्रीसरस्वत्यैनमः अर्जुनउवाच ज्ञानंच
१ धर्मशास्त्राणांगुरुत्वाद्भुत्यतरंतथा मयाकुलपरिज्ञातंवाङ्मयं
सचराचरं १ सूर्यस्तुतिमयंन्यासंवक्तुमर्हसिमाधव यज्ज्ञात्वामु
च्यतेजंतुर्जन्ममृत्युजरादिभिः २ सत्यंपृच्छामिदेवेशकथयस्वप्र
सादतः सूर्यभक्तिंकरिष्यामिकथंसूर्यंप्रपूजयेत ३ तदहंश्रोतु
मिच्छामित्वत्प्रसादेनयादव श्रीभगवानुवाच रुद्रादिदेवतैः
सर्वैःपृष्ठेनकथितंमया वक्ष्येहंकर्मविन्यासंशृणुयत्नेनपांडव ४
अस्माकंयत्वयापृष्टमेकचित्तोभवार्जुन तदहंसंप्रवक्ष्यामिआ
दिमध्यावसानकं ५ अर्जुनः नारायणसुरश्रेष्ठपृच्छामित्वां
महायशाः कथमादित्यमुद्यंतमुपतिष्ठेत्सनातनं ७ श्रीकृष्णः १
साधुपार्थमहाबाहोबुद्धिमानसिपांडव यन्मांपृच्छस्युपस्थानंत

त्वंविभावसाः ८ सर्वमंगलमांगल्यंसर्वपापप्रणाशनं सर्वरो
गप्रशमनमायुर्वर्धनमुत्तमं ९ अमित्रदमनंपार्थसंग्रामेजयवर्धनं
वर्धनंधनपुत्राणामादित्यहृदयंशृणु १० यच्छ्रुत्वासर्वपापेभ्योमु
च्यतेनात्रसंशयः त्रिषुलोकेषुविख्यातंनिःश्रेयसकरंपरं ११ देवदे
वानमस्कार्यप्रातःस्नायन्चार्जुन इच्छन्धनपुत्रायुरारोग्यैश्वर्यसं
पदः १२ विघ्नान्यनेकरूपाणिनश्यंतिस्मरणादपि तस्मात्सर्वप्रय
त्नेनसूर्यमाराधयेत्सदा १३ आदित्यहृदयंपुण्यंज्ञायतंशृणु
पांडव यच्छ्रुत्वामुच्यतेजंतुर्दारिद्र्यादतिदुस्तरात १४ अस्यश्रीआ
दित्यहृदयस्तोत्रमंत्रस्य श्रीकृष्णऋषिः श्रीसूर्यनारायणोदेवता
अनुष्टुप्छंदः हरितहयरथंदिवाकरंघृणिरितिबीजं ओंनमोभग
वतेजितवैश्वानरजातवेदसेनमइतिशक्तिः ॐनमोभगवतेआदि
त्यायेतिकीलकं श्रीसूर्यनारायणप्रीत्यर्थंममाभीष्टकामनासं

आ॰हृ॰ २ सिध्यर्थे जपे विनियोगः अर्कं तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्यसेत्
विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरं १५ नासिकायां न्यसेद्भानुं
मुखे वै भास्करं न्यसेत् पर्जन्यमोष्ठयोश्चैव तीक्ष्णं जिह्वान्तरं न्यसेत् १६
सुवर्णरेतसं कंठे स्कंधयोस्तिग्मतेजसं बाह्वोस्तु पूषणं चैव मित्रं वै पृ
ष्ठतो न्यसेत् १७ वरुणं दक्षिणे हस्ते त्वष्टारं वामतो न्यसेत् हस्तावु
ष्णकरः पातु हृदयं पातु भानुमान् १८ उदरे तु यमं विद्यादादित्यं नाभि
मंडले कट्यां तु विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्यसेत् १९ जान्वोस्तु गोप
तिं न्यस्य सवितारं तु जंघयोः पादयोश्च विवस्वंतं गुल्फयोश्च दिवाक
रं २० बाह्यतश्च तमोध्वंसं भगमभ्यंतरं न्यसेत् सर्वांगेषु सहस्रांशुं
दिग्विदिक्षु भगं न्यसेत् २१ एष आदित्यविन्यासो देवानामपि दुर्ल
भः इमं भक्त्या न्यसेत् पार्थ स याति परमां गतिं २२ कामक्रोधकृतात्पा २
पान्मुच्यते नरः पादपि भयं नास्ति संग्रामेषु पथिष्वपि २३

रिपुसंघट्टकाले च तथा चौरसमागमे त्रिसंध्यं जपतो न्यासं महापात
कनाशनं २४ विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवं शिरोरोगं नेत्ररो
गं सर्वव्याधिविनाशनं २५ कुष्ठरोगक्षयाद्दद्रुरोगांश्च विविधाश्च ये ज
पमानस्तु न पश्यंति भक्त्या शृणु तदर्जुन २६ आदित्यमंत्रसंयुक्तमादि
त्यं भुवनेश्वरं आदित्यान्नापरो देव आदित्यः परमेश्वरः २७ आदित्य
मर्चयद्ब्रह्मा शिव आदित्यमर्चयेत् यदादित्यमयं तेजो मम तेजस्तद
र्जुन २८ त्रिसंध्यमर्चयेत्सूर्यं स्मरेद्भक्त्या तु यो नरः न स पश्यति दारि
द्र्यं जन्मजन्मनि चार्जुन २९ एतत्ते कथितं पार्थ आदित्यहृदयं मया
यद्दं परया भक्त्या ब्राह्मणाय प्रयच्छति ३० मुच्यते सर्वपापेभ्यः सूर्यलो
कं स गच्छति ॐ नमो भगवते तुभ्यमादित्याय नमो नमः ३१ आदित्यः स
विता सूर्यः खगः पूषा गभस्तिमान् सुवर्णः स्फुरितो भानुः स्फुटितो विश्व
तापनः रविर्विश्वो महातेजाः सुवर्णः सुप्रबोधकः ३२ हिरण्यगर्भस्त्रि

आ०ह० शिरास्तपनो भास्करो रविः मार्तण्डो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान्
३ ३३ तमिस्रहा भगो हंसो नासत्यश्च तमोनुदः शुद्धो वीरोचनः केशी सह
स्रांशुर्महाप्रभुः ३४ विवस्वान् पूषणो मृत्युर्मिहिरो जामदग्न्यजित् घ
र्मरश्मिः पतंगश्च शरण्यो मित्रहा तपः ३५ दुर्विज्ञेयगतिः शूरस्तेजोराशि
र्महायशाः शं-भुश्चित्रांगदो धौम्यो हव्यकव्यप्रदायकः ३६ अंशुमा
नुत्तमो देवो ऋग्यजुः सामएव च हरिदश्वस्तमोदारः सप्तसप्तिर्मरीचि
मान् ३७ अग्निगर्भो दितेः पुत्रः शंभुस्तिमिरनाशनः पूषा विश्वंभरो
मित्रः सुवर्णः सुप्रदीपकः ३८ आतापी मंडली भास्वांस्तपनो विश्वता
पनः कृतविश्वो महातेजाः सर्वरत्नमयोद्भवः अक्षरश्चाक्षरश्चैव प्रभा
करो दिवाकरः चंद्रश्चांद्रांगदः सौम्यो हव्यकव्यप्रदो विभुः ४० अंगार
को गदो गस्त्यारकोंगश्चांगवर्धनः बुधो बुधासनो बुद्धिर्बुद्धात्मा बुद्धि
वर्धनः ४१ बृहद्भानुर्बृहद्भासो बृहद्धामा बृहस्पतिः शुक्रस्त्वं शुक्र ३

रेता च शुक्रांगः शुक्रः सप्तधा शनिमांश्छनिरूपस्त्वं शनैर्गच्छति सर्वदा
अनादिरादिरादित्यस्तेजोराशिर्…ायशाः ४३ अनादिरादिरूपस्त्व
मादित्योदिक्पतिर्यमः भानुमान्भानुरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान् ४४
धूमकेतुर्महाकेतुः सर्वकेतुर्महामहः तिमिरावरणः शंभुः स्रष्टा मार्तण्ड ए
व च ४५ नमः पूर्वाय गिरये पश्चिमाय नमः नमोत्तराय गिरये दक्षिणा
य नमो नमः ४६ नमो नमः सहस्रांशो आदित्याय नमो नमः नमः पद्म
प्रबोधाय नमस्ते द्वादशात्मने ४७ नमो विश्वप्रबोधाय नमो भ्राजिष्णु
जिष्णवे ज्योतिषे च … स्तुभ्यं ज्ञानार्काय नमो नमः ४८ प्रदीप्ताय प्र
गल्भाय युगांताय नमो नमः नमस्ते होतृपतये पृथिवीपतये नमः ४९
नमोंकारवषट्कार सर्वयज्ञ नमोस्तु ते ऋग्वेदादि यजुर्वेदः सामवेद
नमोस्तु ते। ५० नमो हाटकवर्णाय भास्कराय नमो नमः जो
याय जयभद्राय हरिदश्वाय ते नमः ५१ दिव्याय दिव्यरूपाय ग

हाणांपतयेनमः नमस्त्रैलोक्यनाथायभूतानांपतयेनमः नमस्तेसुव्रत
नित्यंसर्वांकुरकुलात्मने नमोवोकल्पनाशायनमस्तेदिव्यचक्षुष ५३
त्वंज्योतिस्त्वंद्युतिब्रह्मात्वंविष्णुस्त्वंप्रजापतिः त्वमेवरुद्रोरुद्रात्मावायु
रग्निस्त्वमेवच योजनानांसहस्रेद्वेद्वेशतेद्वेचपञ्जने एकेननिमिषा
र्धेनक्रममाणनमोस्तुते ५५ अयतश्चनमस्तुभ्यंरक्षतश्चसदान
मः पार्श्वतश्चनमस्तुभ्यंनमस्तेसर्वसर्वग ५६ अरुणोमाघमासे
तुसूर्योवैफाल्गुनेतथा चैत्रमासेतुवेदांगोभानुर्वैशाखतापनः ५७
ज्येष्ठमासेतपेदिन्द्रआषाढेतपतेरविः गभस्तिश्श्रावणेमासियमो
भाद्रपदेतथा ५८ सुवर्णरेताम्बयुजेकार्तिकेतुदिवाकरः मार्गशी
र्षेतपेन्मित्रःपौषेविष्णुसनातनः ५९ इत्येतेद्वादशादित्याःकाश्यपेयाः
प्रकीर्तिताः उग्ररूपामहात्मानस्तपंतेविश्वरूपिणः धर्मार्थकाममो
क्षाणांप्रस्फुटाहेतवोनृप सर्वपापहराश्चैवआदित्यायेप्रपूजिताः ६० ४

एकधाद्दशधाचैवशतधाचसहस्रधा तपंतिविश्वरूपेणसृजंतिच
हरंतिच ६२ एषविष्णुःशिवश्चैवब्रह्माचैवप्रजापतिः महेंद्रश्चैवकारश्च
यमोवरुणएवच ६३ नक्षत्रग्रहताराणामधिपोविश्वतापनः वा
युरग्निर्धनाध्यक्षोभूतकर्ताखयंप्रभुः ६४ एषदेवोहिदेवानांसर्व
माप्यायतेजगत् एषकर्ताहिभूतानांसंहर्तारक्षकस्तथा ६५ एषदा
तावलोकानांसदेवासुरमा[illegible]नाः एषलोकानुलोकांश्चसप्तद्वीपाश्च
सागराः ६६ एषपातालसप्तस्थोदैत्यदानवराक्षसः एषएवप्रजा
नित्यंसंवर्धयतिरश्मिभिः ६७ एषयज्ञस्वधास्वाहाह्रीश्री[illegible]पुरुषो
नमः सर्वदेवात्मकोदेवसूक्ष्मोव्यक्तःसनातनः ईश्वरःसर्वभूतानां
परमेष्ठीपितामहः ६९ कालात्मासर्वभूतात्मावेदात्माविश्वतो
मुखः जन्ममृत्युजराव्याधिसंसारभयनाशनः ७० दारिद्र्यव्यस
नध्वंसीश्रीमान्देवादिवाकरः विकर्तनोविवस्वांश्चमार्तंडोभास्करोर

आ०ह० वि: लोकप्रकाशिमालोकचक्षुर्ग्रहेश्वरः लोकसाक्षी त्रिलोकेशः कर्ताह
५ र्तातमिस्रहा ७२ तपनःपावनश्चैवशुचिःसप्ताश्ववाहनः गभस्तिहस्तो
ब्रह्मण्यःसर्वदेवनमस्कृतः ७३ आयुरारोग्यमैश्वर्यंनरवर्यस्यमेदिर
यस्यप्रसादात्संतुष्टिरादित्यहृदयंजपेत ७४ प्रातरुत्थायकौंतेयत
स्याधिभयंकुतः। पातकान्मुच्यतेपार्थव्याधिभ्यश्चनसंशयः ७५
राकसंध्यांद्विसंध्यंवासर्वपापैःप्रमुच्यते त्रिसंध्यंजपमानस्तुपश्ये
च्चपरमंपदं यदह्नात्कुरुतेपापंतदह्नात्प्रतिमुच्यते यद्रात्र्यात्कुरु
तेपापंतद्रात्र्यात्प्रतिमुच्यते ७६ दद्रुपीटककुष्ठानिमंडलानिवि
सर्पकाः येचान्येदुष्टरोगाश्चज्वरातिसारकादयः ७८ जपमान
स्यनश्यंतिजीवेच्चशरदांशतं संवत्सरेणामरणायदातस्यध्रुवंभ
वेत ७९ अशीर्षांपश्यतीछायामहोरात्रंधनंजय यस्त्विदंपठते ५
मत्यावारभानोर्महात्मनः प्रातस्नानकृतेपार्थएकाग्रकृतमानसः

…शिताश्रय· मनोज्ञ

सुवर्णांचक्षुर्भवतिनचाधस्तुप्रजायते पुत्रवान्धनसंपन्नोजायते
वातउमस्तथा ८१ आदित्यहृदयंपुण्यंसूर्यनामविभूषितं ८२ श्रु
त्वानिखिलंपार्थसर्वपापैःप्रमुच्यते ८३ अतःपरतरंनास्तिसिद्धिका
मस्यपांडवः एतज्जपस्वकौंतेययेनश्रेयोह्यवाप्स्यसि ८४ आदि
त्यहृदयंपुण्यंयःपठेत्सुसमाहितः भ्रूणाहान्मुच्यतेपापात्कृतघ्नाद्गो
घ्नवधच ८५ यइदंशृणुयान्नित्यंसजपेद्वापिसमाहितः सर्वपाप
विशुद्धात्मासूर्यलोकेमहीयते ८६ अपुत्रोलभतेपुत्रान्सुजन्मा
जन्मचाप्नुयात कुष्ठरोगोमुच्यतेरोगभक्त्यायःपठतेसदा ८७ यस्त्वा
दित्यदिनेपार्थनाभिमात्रेजलेस्थितः उदयाचलमारूढंभास्करं
प्रणतास्थितः जपतेमानवोभक्त्याशृणुयाद्वापिभक्तिलः सर्वपाति
परमस्थानंयत्रदेवोदिवाकरः ८८ अमित्रदमनोपीडांयकर्तुंसमा
रभेत तदाप्रतिकृतिंकृत्वाशत्रोःश्चरणपांसुभिः ८९ आक्रम्यवा

आ॰हृ॰
६

मयोदेनआदित्यहृदयंजपेत् २२ ॐ हिमालीस्वाहा ॐ हिमालिद्रस्वा
हानिलिदस्वाहा २१ त्रिसिश्चेरोगीभवतिज्वरीभवति पंचभिः जपेत्तु
सप्तभिःपार्थरासससीत्तनुमाविशेत् २३ राक्षसेनाभिभूतस्यविका
रंशृणुपांडव गायतेनृत्यतेनग्नआस्फोटयतिधावति २४ शिवार
तंवकुरुतेहसतेक्रंदतेपुनः एवंसंपीड्यतेपार्थयघपिस्यान्महेश्व
रः २५ किंपुनर्मानुषःकश्चिच्छौचाचारविवर्जितः पीडितस्यनसंदे
होज्वरोभवतिधदारुणः २६ यदाचानुग्रहंतस्यकर्तुमिच्छेत्सुसंकरं
तदासलिलमादायजपेन्मंत्रमिमंबुधः २८ ॐ नमोभगवतेतुभ्य
मादित्यायनमोनमः जपायजयप्रदायहरिदश्वायतेनमः २९
द्विसायदिव्यरूपायग्रहाणांपतयेनमः स्नापयेत्तेनमंत्रेणास्तु
संभवतिनान्यथा अन्यथाहिभवेद्दोषोनश्यतेनात्रसंशयः
स्त्तवस्तेनिखिलःप्रोक्तःपूजाविधानबोधम १०० उपलिप्यशुचौदेशे ६

… ता … भय. मनोज्ञ
नियतोवाग्यतःशुचिः … कृत्वाचतुरस्त्रंवामंडलम् … म
त्रलिखेत्पद्ममष्टपत्रंसकर्णिकं पूर्वे … त्रन्यसेत्सूर्यमाग्नेय्यांचरविंन्यसे
त् २ याम्यांचैवविवस्वंतंनैर्ऋत्यांतुभगंन्यसेत् वारुण्यांचवरुणंविद्या
द्वायव्यांमित्रमेवच ३ आदित्यमुत्तरपत्रेईशान्यांविष्णुमेवच मं
ध्येतुभास्करंन्यस्यक्रमेणैवसमर्चयेत् ४ अनुष्ठानमिदंप्रोक्तंस
र्वकामप्रदायकं अतःपरंप्रवक्ष्यामिसिद्धिकामस्यपांडव महातेजः
समुद्यंतंप्रणिपत्यकृतांजलिः सकेसराणिपद्मानिकरवीराणि
चार्जुन ७ तिलतंडुलयुक्तानिकुशगंधोदकेनतु रक्तचंदनमि
श्राणिकलापेताम्रभाजने ७ दत्वाशिरसितत्पात्रंजानुभ्यांध
रणींस्पृशन् मंत्रपूतंगुडाकेशअर्घ्यंदद्याद्गभस्तये ८ ॐ विद्यो
किलिकिलिकटुकेरसर्वार्थसाधनायस्वाहा ॐ ह्रूं ह्रीं हूंस

आ०ह० यीयस्वाहा ॐ कूं मार्तण्डायस्वाहा ११ नमोस्तुसूर्यायसहस्रभानो
९ नमोस्तुवैश्वानरजातवेदसे त्वमेवचार्घ्यंप्रतिगृह्णगृह्णदेवाधिदे विव
नमोस्तुतुभ्यं १२ नमोभगवतेतुभ्यंनमस्तेजातवेदसे दत्तमर्घ्यं
मयाभानो त्वंगृहाणनमोस्तुते १३ एहिसूर्यसहस्रांशुस्तेजोराशेज
गत्पते अनुकंपयमांभक्त्यागृहाणार्घ्यंनमोस्तुते १४ ॐ नमोभग
वतेसूर्यायनमः ॐ अक्षय्यतेजसेनमः ॐ आदित्यायनमः ॐ
शिवायनमः १८ आदित्यंचशिवंविद्याच्छिवमादित्यरूपिणं उभयो
रंतरंनास्तिआदित्यस्यशिवस्यच १९ उदयेब्रह्मणोरूपंमध्याह्नेतुम
हेश्वरः अस्तमानेस्वयंविष्णुस्त्रिमूर्तिस्तुदिवाकरः २० नमोभगव
तेतुभ्यंविश्वेशप्रतिश्वे ममेदमर्घ्यंगृह्णत्वंदेवदेवनमोस्तुते २१ दिश ६
हिमघ्नायतमोघ्नायरक्षोघ्नायनमोनमः कृतघ्नघ्नायदेवायतस्मै

सूर्यायतेनमः २२ जयाज… वजयाजितप्राणोजिताश्रय. मनोज
यजितक्रोधोवाजिनःसप्तकीर्तिताः २३ हरितहयरथंदिवाकरंकनकम
यांबुजरेणुपिंजरं प्रतिदिनमुदयेनवंनवंशरणमुपैमिहिरण्यरेत
सं २४ तत्रव्यालानबाध्यंतेनव्याधिभ्योभयंभवेत् अमितर
तुमयंनास्तिपार्थिवायस्तथैवच दुर्गतिंतरतेघोरांप्रजांवलमने
पश्नन् एतत्पठतिकौंतेयभक्तियुक्तेनचेतसा २६ अश्वमेधसह
स्रस्यवाजपेयशतस्यच कन्याकोटिसहस्रस्यदत्तस्यलभतेफलं २७
दुदमादित्यहृदयंयोधीतेसततंनरः सर्वपापविशुद्धात्मासूर्यलोके
महीयते नास्त्यादित्यसमोदेवोनास्त्यादित्यसमागतिः प्रत्यक्षो
भगवान्विष्णुर्येनविश्वंप्रतिष्ठितं २८ गवांशतसहस्रस्यसम्यग्द
नस्ययत्फलं तत्फलंलभतेविद्वाञ्छुद्धात्मास्तौतियोरविं २९ याधी

आ०सू० तेसूर्यहृदयंसकलंकनकाप्नुयात अष्टानांब्राह्मणानांचलेखयि
८ त्वासमर्पयित ३२ ब्रह्मलोकेऋषीणांवज्ञायंतेमानुषापिवा जा
तिस्मरत्वमाप्नोतिशुद्धात्मानात्रसंशयः ३३ अजायलोकत्रयपाव
नायमहात्मनेगोपतयेवृषाय सूर्यायलोकप्रलयांतकायनमोम
हाकारुणिकोत्तमाय ३४ विवस्वतेज्ञानभृदंतरात्मनेजगत्प्रदीपा
यजगद्धितैषिणे स्वयंभुवेदीप्तसहस्रचक्षुषेसुरोत्तमायामितते
जसेनमः ३५ सुरनरनिकरैःपरिसेविताय हिरण्यगर्भाय हिरण्म
याय महात्मनेमोक्षपदायनित्यंनमोस्तुतेवासरकारणाय ३६
आदित्यश्चार्चितोदेवैरादित्यःपरमंपदं आदित्योमातृकोभूत
आदित्योवाङ्मयंजगत ३७ आदित्यंपश्यतेभक्त्याध्रुवंपश्यति
मांनरः नादित्यंपश्यतेभक्त्या नसपश्यतिमांनरः ३८ त्रैगुण्यं

च त्रिवेदंत्वत्रयोलोकास्त्रयोग्नयः त्रयाणांतंत्रयीमूर्तिस्तुरीयस्त्वं
नमोस्तुते ३९ नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाश
हेतवे त्रयीमयायत्रिगुणात्मधारिणेविरिंचिनारायणशंकरात्म
ने ४० यस्योदयेनेहजगत्प्रबुध्यः प्रवर्ततेचाखिलकर्मसिद्धये ब्र
ह्मेंद्रनारायणरुद्रवंदितःसनःसदायच्छतुमंगलंरविः ४१ नमोस्तु
सूर्यायसहस्ररश्मयेसहस्रशाखान्वितसंभवात्मने सहस्रयोगो
द्भवभावभागिनेसहस्रसंख्यायुगधारिणेनमः ४२ यन्मंडलंदी
प्तिकरंविशालंरत्नप्रभंतीव्रमनादिरूपं दारिद्र्यदुःखक्षयकारणंच
पुनातुमांतत्सवितुर्वरेण्यं ४३ यन्मं० देवगणैःसुपूजितंविप्रैःस्तु
तंभावनमुक्तिकोविदं तंदेवदेवंप्रणमामिसूर्यं पु० ४४ यन्मं० ज्ञान
घनंत्वगम्यंत्रैलोक्यपूज्यंत्रिगुणात्मरूपं समस्ततेजोमयदिव्य

आ० ह० २ रूपं पु० ४५ यन्मं० मूढमतिप्रबोधं धर्मस्यवृद्धिंकुरुतेजनस्य यत्स
र्वपापक्षयकारणं च वपु० ४६ यन्मं० व्याधिविनाशदक्षं यदृग्यजुःसामसुसंप्र
गीतं प्रकाशितं येन च भूर्भुवःस्वःपु० ४७ यन्मं० वेदविदोवदंतिनित्यमर्त्यमत्यानु
रसिद्धयसाः यद्योगिनांयोगपथानुगम्यं पु० ४८ यन्मं० सर्वजनेषुपूजितं च
तिष्ठत्रूपादिहमर्त्यलोके यत्कालकालादिमनादिरूपं पु० ४९ यन्मं० विष्णु
श्चतुर्मुखाख्यायदक्षरंपापहरंजनानां यत्कल्पकल्पक्षयकारणं च पु० ५०
यन्मं० सर्वगतस्यविष्णोरात्मापरंधामविशुद्धसत्वं सूक्ष्मांशकैर्योगरत
प्रसिद्धं पु० ५१ यन्मं० विश्वसृजप्रसिद्धमुत्पत्तिरक्षाप्रळयप्रगल्भं यस्मा
ज्जगज्जीवतिसर्वमेव पु० ५२ यन्मं० वेदविदोवदंतिगायंतियच्चारणसि
द्धसंघाः यन्मंजपोमं च नित्यंस्मरंती पु० ५३ यन्मं० वेदविदांप्रगीतंयद्यो
गिनांयोगपथानुगम्यं तत्सर्ववेदंप्रणमामिसूर्यंपुनातुमांतत्सवितु २
र्वरेण्यं ५४ ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजा
हि

सनसंनिविष्टः केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृत
शंखचक्रः ५५ सशंखचक्रंरविमंडलेस्थितंकुशेशयाक्रांतमनंतमच्यु
तं भजामिबुध्यातपनीयमूर्तिंसूरोत्तमंरत्नविभूषितोज्वलं ५६ वेदवे
दांगशरीरंदिव्यदीप्तिकरंपरं रक्षोघ्नंरक्तवर्णं च रक्तसिंहारवाकृति ५७
एकचक्ररथोयस्यदिव्यःकनकभूषणः समेभवतुसुप्रीतःपद्महस्तोदि
वाकरः ५८ आदित्यःप्रथमंनामद्वितीयंतुदिवाकरः तृतीयंभास्करःप्रो
क्तंचतुर्थंतुप्रभाकरः ५९ पंचमंतुसहस्रांशुःषष्ठंचैवत्रिलोचनः सप्तमं
हरिदश्वश्चअष्टमंतुविभाकरः ६० नवमंदिनकरःप्रोक्तंदशमंद्वादशात्म
कः एकादशंत्रयीमूर्तिर्द्वादशंसूर्यएवच ६१ द्वादशादित्यनामानि
प्रातःकालेपठेन्नरः दुःस्वप्नोनश्यतेतस्यसर्वदुःखंचनश्यति ६२ दद्रुकुष्ठ
हरंचैवदारिद्र्यंहरतेध्रुवं सर्वतीर्थप्रदंचैवसर्वकामप्रदायकं ६३
यःपठेत्सानरस्नायभक्त्यानित्यमिदंनरः सौख्यमायुस्तथारोग्यं

लभतेमोक्षमेवच ६४ अग्निमीळेनमस्तुभ्यमिषेत्वोर्जेस्वरूपिणे
अग्नआयाहिवीतयेनमस्तेज्योतिषांपते ६५ शन्नोदेवीनमस्तुभ्यं
जगच्चक्षुर्नमोस्तुते ६६ ॥ पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः
सप्ताश्वरथमारूढोद्विभुजःस्यात्सदारविः ६७ आदित्यस्यनमस्का
रंयेकुर्वंतिदिनेदिने जन्मांतरसहस्रेषुदारिद्र्यंनोपजायते ६८
इतिश्रीभविष्योत्तरपुराणेश्रीकृष्णार्जुनसंवादेआदित्यहृदयस्तो
त्रंसंपूर्णं ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभमस्तु ॥